## SA-I (CLASS-VIII)
## विषयः संस्कृतं

अवधिः - होरात्रयम् पूर्णाङ्काः - **80**

*निर्देशाः -*
*(1) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*
*(2) प्रतिखण्ड-उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।*
*(3) प्रत्येकं खण्डं अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*
*(4) प्रश्नपत्रे उत्तराणि न लेखनीयानि।*
*(5) प्रश्नसंख्या प्रश्नपत्रानुसारं अवश्यमेव लेखनीया।*
*(6) सर्वेषां प्रश्नानां उत्तराणि संस्कृतेन लेखनीयानि।*

### खण्डः - 'क' (अपठित-अवबोधनम्) अङ्काः 10

प्र1. अधोलिखितम् अनुच्छेदम् पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत -

गङ्गा भारतस्य सर्वासु नदीषु पवित्रतमा श्रेष्ठा च नदी अस्ति। इयं हिमालयस्य गङ्गोत्री-स्थानात् निर्गच्छति। तदा अस्याः स्रोतः लघु भवति। पश्चात् अनेके निर्झराः अस्यां नद्याम् आमिलन्ति, यैः गङ्गायाः जलस्य प्रवाहः तीव्रः भवति। पर्वतस्य प्रान्तेभ्यः निःसृत्य गङ्गा हरिद्वारनामके स्थाने समतलं भूभागं प्रविशति, तत्र हरिद्वारतीर्थे प्रतिवर्षं लक्षाणि पुरुषाः गच्छन्ति, गङ्गायाः शीतले जले स्नानं कुर्वन्ति। ते अमृतसमं जलं पीत्वा सुखम् अनुभवन्ति निजभाग्यस्य प्रशंसां च कुर्वन्ति। गङ्गायाः उत्पत्ति-विषये इयं कथा प्रचलिता अस्ति यत् भगीरथः नाम नृपः स्वपूर्वजानाम् उद्धाराय तपस्याम् अकरोत्। तपस्यायाः प्रभावेण सः गङ्गां स्वर्गात् भूतलम् आनयत्। अतएव गङ्गां 'भागीरथी' अपि कथयन्ति। गङ्गायाः तटे लक्ष्मणझूला ऋषिकेशः, हरिद्वारम्, प्रयागः, वाराणसी च एतानि प्रधानानि तीर्थस्थानानि सन्ति, यत्र प्रतिदिनं सहस्राणि जनाः श्रद्धया स्नानं कुर्वन्ति गङ्गां पूजयन्ति च।

I. एकपदेन उत्तरत - (4x½=2)
   - (i) गंगायाः जलस्य प्रवाहः कीदृशः भवति?
   - (ii) गंगायाः अन्यत् नाम किम् अस्ति?
   - (iii) जनाः गंगायाः शीतले जले किम् कुर्वन्ति?
   - (iv) पुरुषाः प्रतिवर्षम् कुत्र गच्छन्ति?

II. पूर्णवाक्येन उत्तरत - (2x2=4)
   - (i) गंगायाः तटे कानि तीर्थस्थानानि सन्ति?
   - (ii) गंगा कस्मात् स्थानात् निर्गच्छति?

III. यथानिर्देशं उत्तरत - (4x½=2)
   - (i) 'सः गंगां स्वर्गात् भूतलम् आनयत्' अस्मिन् वाक्ये 'सः' सर्वनामपदं कस्मै प्रयुक्तम्?
   - (ii) 'निर्गच्छति' अस्य क्रियापदस्य कर्तृपदम् किम् अस्ति?
   - (iii) 'नदी' अस्य विशेष्यपदस्य विशेषणपदं किम् अस्ति?
   - (iv) 'उष्णे' अस्य पदस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

IV. अस्य गद्यांशस्य कृते समुचितं शीर्षकं लिखत। (2)

2. मित्रं प्रति लिखितं निम्नलिखितं पत्रं मञ्जूषायां प्रदत्तै पदैः पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत - (5)

| मञ्जूषा |
|---|
| चतुर्वादने, सोमेश, कमलवत्, भवतः, आयोज्यते, प्रणामाः, नवदिल्लीतः, दिने, पितुः, अस्माकम् |

5, सोमविहार,

रामकृष्णपुरम्

(1)__________

दिनांकः__________

प्रिय मित्र (2)__________

सस्नेहं नमस्कारः।

अत्र सर्वं कुशलं। मम (3)__________ स्थानान्तरणं शिमलातः दिल्लीनगरे सञ्जातम्। (4)__________ गृहं कमलमन्दिरस्य समीपे एव अस्ति। एतत् मन्दिरं (5)__________ श्वेतपाषाणैः निर्मितम्। भवान् कस्मिंचिद् (6)__________ अत्र आगच्छतु। सायं (7)__________ तत्र सर्वधर्मप्रार्थना (8)__________। वयम् सर्वे मिलित्वा तत्र गमिष्यामः।

पितृचरणेषु मम (9)__________ निवेद्यन्ताम्।

(10) __________ प्रियमित्रं

रविः

प्र3. निम्नचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चसंस्कृतवाक्यानि लिखत - (10)

| मञ्जूषा |
|---|
| गुरुकुलस्य, शिष्याः, गुरुः, पुस्तकम्, कुटीरं, खगः, वृक्षाः, हस्ते, आकाशे, शशकः, उत्पतति |



## खण्डः - 'ग' (अनुप्रयुक्तव्याकरणम्) अङ्काः 25

प्र4. अधोलिखितवाक्येषु रेखांकितपदानां सन्धिच्छेदं सन्धिं वा कृत्वा पुनः पूर्णवाक्यं लिखत - (4x1=4)

(i) अस्य शुभ + आरम्भः कदा भविष्यति?

(ii) रजनीशः अस्मिन् गृहे एव वसति।

(iii) अद्यैव त्वम् तत्र गच्छ।

(iv) अहं मधुर + औदनम् वाञ्छामि।

प्र5. (क) अधोलिखितवाक्ययोः रेखांकितपदस्य प्रकृति-प्रत्ययौ पृथक्-पृथक् कृत्वा अथवा संयोज्य पुनः वाक्यानि लिखत - (2x1=2)

(i) मम पिता प्रातः उत् + स्था + ल्यप् भ्रमणाय गच्छति।

(ii) मयूरः नर्तित्वा प्रसीदति।

(ख) (i) क्त्वा प्रत्ययं संयोज्य वाक्यसंयोजनम् कुरुत - (2x1=2)

सुधा पाठं स्मरति। सा विद्यालयं गच्छति।

(ii) ल्यप् प्रत्ययं संयोज्य वाक्यसंयोजनम् कुरुत -

बालकः जनकं प्रणमति। सः विद्यालयं गच्छति।

प्र6. मञ्जूषायां दत्तैः अव्ययपदैः वाक्यपूर्तिं कुरुत - (5x1=5)

| मञ्जूषा |
|---|
| उच्चैः, बहिः, परश्वः, इतस्ततः, सर्वत्र |

(i) _________ विद्यालये अवकाशः भविष्यति।

(ii) रात्रौः कुक्कुराः मार्गे _________ भ्रमन्ति।

(iii) कक्षायाम् _________ मा वदत।

(iv) ईश्वरः _________ अस्ति।

(v) नगरात् _________ एकम् उद्यानम् अस्ति।

प्र7. उचितशब्दरूपैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत - (4x1=4)

(i) _________ भ्राता अस्मिन् विद्यालये पठति। (अस्मद्)

(ii) सा _________ फलानि आनयति। (मातृ, चतुर्थी विभक्ति, एकवचन)

(iii) अहं _________ सह चलचित्रं द्रष्टुम् गमिष्यामि। (युष्मद्)

(iv) सर्वे बालकाः _________ नमन्ति। (मुनि)

प्र8. उचितधातुरूपैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत - (4x1=4)

(i) ते हस्तौ प्रक्षाल्य भोजनं _______। (खादेत्/खादेम/खादेयुः)

(ii) श्वः यूयं गुरुम् _______। (नम्)

(iii) ह्यः कक्षायाम् छात्रः एकं प्रश्नं _______। (प्रच्छ्)

(iv) युवाम् पितरम् _______। (नम् - लोट् लकारे)

प्र9. कोष्ठगतशब्देषु उचितविभक्तिं प्रयुज्य वाक्यानि उत्तरपुस्तिकायाम् लिखत - (4x1=4)

(i) ________ कमलं सुन्दरम् अस्ति। (पुष्प)

(ii) ________ नमः। (शिव)

(iii) मम ________ अधः एकः आपणः अस्ति। (गृह)

(iv) नरः ________ विभेति। (सर्प)

## खण्डः - 'घ' (पठित-अवबोधनम्)

अङ्काः 30

प्र10. अधोलिखितं गद्यांशं पद्यांशं नाट्यांशं च पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत - (5)

*(क) गद्यांशः*

लोमशिका चंचलं अकथयत् - बाढम्, त्वं जालं प्रसारय। पुनः सा व्याघ्रम् अवदत् - केन प्रकारेण त्वम् एतस्मिन् जाले बद्धः इति अहं प्रत्यक्षं द्रष्टुम् इच्छामि। व्याघ्रः तद् वृत्तान्तं प्रदर्शयितुं तस्मिन् जाले प्राविशत्। लोमाशिका पुनः अकथयत् - सम्प्रति पुनः पुनः कूर्दनम् कृत्वा दर्शय। सः तथैव समाचरत्। अनारतं कूर्दनेन सः श्रान्तः अभवत्।

I. एकपदेन उत्तरत - (1x½=1)

(i) अनारतं कूर्दनेन कः श्रान्तः अभवत्?

(ii) का व्याघ्रं पुनः जाले प्रवेशं कर्तुम् अकथयत्?

II. पूर्णवाक्येन उत्तरत - (2x1=2)

(i) व्याघ्रः किमर्थं तस्मिन् जाले प्राविशत्?

(ii) प्रथमं लोमशिका चञ्चलं किम् अकथयत्?

III. निर्देशानुसारं उत्तरत - (4x½=2)

(i) 'क्लान्तः' अस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(ii) 'इच्छामि' क्रियापदस्य कर्तृपदम् किम् अस्ति?

(iii) 'अप्रत्यक्षं' अस्य विलोमपदं चित्वा लिखत।

(iv) 'सः तथैव समाचरत्' अत्र 'सः' सर्वनामपदं कस्मै प्रयुक्तम्?

*(ख) पद्यांशः*

गुणा गुणज्ञेषु गुणा भवन्ति
ते निर्गुणं प्राप्य भवन्ति दोषाः।
सुस्वादुतोयाः प्रभवन्ति नद्यः
समुद्रमासाद्य भवन्त्यपेयाः ॥

I. एकपदेन उत्तरत - (2x½=1)

(i) कम् प्राप्य गुणाः दोषाः भवन्ति?

(ii) गुणाः कुत्र गुणाः भवन्ति?

II. पूर्णवाक्येन उत्तरत - (2x1=2)

(i) समुद्रमासाद्य काः अपेयाः भवन्ति?

(ii) नद्यः कीदृशाः प्रभवन्ति?

III. निर्देशानुसारं उत्तरत - (4x½=2)

(i) 'सागरम्' शब्दस्य पर्यायपदं चित्वा लिखत।

(ii) 'गुणाः' अस्य कर्तृपदस्य क्रियापदम् किम् अस्ति?

(iii) 'दोषाः' अस्य पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(iv) 'सुस्वादुतोयाः नद्यः' अनयोः पदयोः विशेष्यपदम् किम् अस्ति?

*(ग) नाट्यांशः*

राजीवः - भवति! गृहे यथा सर्वाधिका रम्या मनोरमा च भगिनी भवति तथैव भारतगृहेऽपि सर्वाधिकाः रम्याः इमाः सप्तभगिन्यः सन्ति।

अध्यापिका - मनस्यागता ते इयं भावना परमकल्याणमयी परं सर्वे न तथा अवगच्छन्ति। अस्तु, अस्ति तावदेतेषां विषये किञ्चिद् वैशिष्ट्यमपि कथनीयम्। सावहितमनसा शृणुत - जनजातिबहुलप्रदेशोऽयम् गारो-खासी-नगा-मिजो-प्रभृतयः बहवः जनजातीयाः अत्र निवसन्ति। शरीरेण ऊर्जस्विनः एतत्प्रादेशिकाः बहुभाषाभिः समन्विताः पर्वपरम्पराभिः परिपूरिताः, स्वलीला-कलाभिश्च निष्णाताः सन्ति।

I. एकपदेन उत्तरत - (2x½=1)

(i) मनसि कीदृशी भावना आगता?

(ii) भारतगृहे सर्वाधिकाः रम्याः काः सन्ति?

II. पूर्णवाक्येन उत्तरत - (2x1=2)

(i) सप्तभगिनी-प्रदेशे काः काः जनजातीयाः निवसन्ति?

(ii) गृहे भगिनी कीदृशी भवति?

III. यथानिर्देशम् उत्तरत - (4x½=2)

(i) 'इयं भावना' अनयोः पदयोः विशेषणपदम् किम् अस्ति?

(ii) 'निपुणाः' अस्य किम् पर्यायपदम् अत्र प्रयुक्तम्?

(iii) 'गता' अस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

(iv) 'अवगच्छन्ति' क्रियापदस्य कर्तृपदम् किम्?

प्र11. अधोलिखितश्लोकस्य अन्वयं उचितपदक्रमेण पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत - (4x1=4)

पथि पाषाणा विषमाः प्रखराः।  
हिंस्राः पशवः परितो घोराः॥  
सुदुष्करं खलु यद्यपि गमनम्।  
सदैव पुरतो निधेहि चरणम्॥